यभेदे तत्र च प्रतिपाद्यविषयाश्च प्रथमं ग्रहाणां मध्यमगत्यादिकम् । ततः कालमानम् ततो भगणाः। मध्यग्रहस्पष्टताकरणम् ग्रहकक्षामानम् । प्रत्यब्दशुद्धिः । अधिमासादिनिर्णयः। स्पष्टग्रहानयनम् । त्रिप्रश्नाधिकारः । पर्व्वसम्भवः । चन्द्रग्रहणम् सूर्य्यग्रहणम् ग्रहच्छाया । ग्रहोदयास्तमनादि । ग्रहशृङ्गोन्नतिः । ग्रहयुतिः । भग्रहयुतिः पाताधिकारश्चेति । [गणनाकर्त्तरि ।

**गणितिन्** त्रि० गणितमनेन गणित+इष्टा० कर्त्तरि इनि ।

**गणिपिटका** स्त्री हेमचन्द्रोक्ते आचाराङ्गादिषु द्वादशसु जिनानामङ्गेषु । यथा "आचाराङ्गं सूत्र कृतं२ स्थानाङ्गं३ समवाययुक्४ । पञ्चमं भगवत्यङ्गं५ ज्ञाता धर्म्मकथा६ ऽपि च । उपासकाऽन्तकृत्७ अनुत्तरापातिका८ दशाहः९ । प्रश्नव्याकरण१०ञ्चैव विपाकश्रुत११ मेव च । इत्येकादश सोपाङ्गान्यङ्गानि द्वादश पुनः । दृष्टिवादो द्वादशाङ्गी स्याद्गणिपिटकाह्वया"

**गणेय** त्रि०गण–एय । गणनीये संख्येये अमरः ।"गणेयनिःशेषगुणोऽपि स स्यात्" नैष० ।

**गणेरु** पु० गण–बा० एरु । १कर्णिकारवृक्षे, २वेश्यायां ३हस्तिन्याञ्च स्त्री मेदि० । [त्रिका० ।

**गणेरुका** स्त्री गणेरुषु वेश्यासु कायति कै–क । १कुट्टिन्याम्

**गणेश** पु०गणानामीशः। १स्वनामख्याते देवे २शिवे च । गणेशोत्पत्तिः इभाननशब्दे ९८१पृ०उक्ता तस्य वक्रतुण्डकपिलचिन्तामणिविनायकादिरूपेण प्रादुर्भावकथा स्कन्दपु० गणेशख० उक्ता । तत एवावसेया विस्तरभयान्नोक्ता । गणेशस्य परब्रह्मरूपत्वं नामभेदात् तद्भेदाश्च गणपति तत्त्वग्रन्थे विस्तरेणोक्ता दिङ्मात्रमुदाह्रियते ।"एष सर्वेश्वरः एष सर्वज्ञः एष भूतपतिरेष भूतलय एष सेतुर्विधरणः प्रधानत्त्वत्रपतिर्गणेशः इति" श्रुतिप्रसिद्धसर्वेश्वरादिपदवद्गणेशपदस्य नित्यसिद्धेश्वरपरत्वम् दृश्यते इत्युपक्रम्य "तस्मात् प्रधानत्त्वत्रपतिर्गणेशः" इति श्रुतेः "गुणत्रयस्येश्वरोऽसि न नाम्ना त्वं गणेश्वरः" इति विनायमसंहितावचनाच्च गणशब्दाभिहितस्य सत्वादिगुणसंघातस्य पतिर्गणेश इति सिद्धमित्युक्तम्"। अन्ते च नमः सहमानायेत्याद्यनुवाकैस्तस्य सर्व्वेषां नाम्नां सङ्कलनेन एकोननवत्यधिकशतद्वयम् इत्युक्तम् । गणपतिभेदाश्च आगममन्त्रैर्व्वेदमन्त्रैर्वाराधनीया इत्यप्युक्तम् । तन्त्रे तु अन्यथा संख्योक्ता यथा शारदतिलकराघवटीकायाम् "विघ्नेशो विघ्नराजश्च विनायकशिवोत्तमौ । विघ्नकृत् विघ्नहर्त्ता च गणैकदद्दन्तकाः । गजवक्त्रनिरञ्जनौ कपर्द्दी दीर्घजिह्वकः । शङ्कुकर्णश्च वृषभध्वजश्च गणनायकः । गजेन्द्रः सूर्पकर्णश्च त्रिलोचनसंज्ञकः । लम्बोदरमहानन्दौ चतुर्म्मूर्त्तिसदाशिवौ । आमोददुर्मुखौ चैव सुमुखश्च प्रमोदकः । एकपादो द्विजिह्वश्च शूरवीरः षण्मुखः । वरदो वामदेवश्च वक्रतुण्डो द्विरण्डकः । सेनानीर्ग्रामणीर्म्मत्तो विमत्तो मत्तवाहनः । जटी मुण्डी तथा खड्गी वरेण्यो वृषकेतनः। भक्ष्यप्रियो गणेशश्च मेघनादकसंज्ञकः। व्यापी गणेश्वरः प्रोक्ताः पञ्चाशद्गणपा इमे । तरुणारुणसङ्काशा गजवक्त्रास्त्रिलोचनाः। पाशाङ्कुशवराभीतिहस्ताः शक्तिसमन्विताः" । तेषाञ्च पञ्चाशच्छक्तयस्तत्रोक्ता यथा "ह्रीः श्रीश्च पुष्टिः शान्तिश्च स्वस्तिश्चैव सरस्वती । स्वाहा मेधा कान्तिकामिन्यौ मोहिन्यपि वै नटी । पार्वती ज्वालिनी नन्दा सुयशाः कामरूपिणी। उमा तेजोवती सत्य विघ्नेशानी सुरूपिणी । कामदा मदजिह्वा च भूतिः स्याद्भौतिकासिता । रमा च महिषी प्रोक्ता मञ्जुला च विकर्णपा । भ्रुकुटिः स्यात्तथा लज्जा दीर्घघोणा धनुर्द्धरा । यामिनी रात्रिसंज्ञा च कामान्धा च शशिप्रभा । लोलाक्षी चञ्चला दीप्तिः सुभगा दुर्भगा शिवा । भर्गा च भगिनी चैव भोगिनी शुभदा मता । कालरात्रिः कालिका च पञ्चाशच्छक्तयः स्मृताः । सर्वालङ्करणोद्दीप्ताः प्रियाङ्कस्थाः सुशोभनाः । रक्तोत्पलकरा ध्येया रक्तमाल्याम्बरावृताः" ।

**गणेशकुण्ड** न० नर्म्मदास्थकुण्डभेदे । तत्कुण्डाविर्भवकथा स्कन्दपु० गणेशख०११ख० यथा "पार्वती सिन्दूरेणाथ दृष्टा सा पर्य्यलीवनै । प्रसुप्तां गिरिजां वीक्ष्य प्रसुप्तं मां (शिवम्) च षण्मुख ! । प्रविवेशोदरं दैत्य उमाया वायुरूपधृक् । छित्त्वा नखैः करे धृत्वा गर्भस्थमस्तकं बहिः । निर्गत्य तच्छिरस्त्यक्तं विन्ध्याचलसमीपतः । यत्रास्ते शर्म्मदात्री सा नर्मदा दुरितापहा । मुक्तिदा सर्वजन्तूनाम् तपसां सिद्धिदायिनी । गणेशकुण्डं तत्राभूदपतद्यत्र तच्छिरः । तदादि नर्मदान्तःस्था कुण्डान्तःस्थास्तथोपलाः । आसन् ये रक्तवर्णाभा गणेशास्तेऽभवन् भुवि"। [शब्दार्थचि०।

**गणेशकुसुम** न० गणेश इव रक्तत्वात् कुसुमम् । रक्तकुरुमे ।

**गणेशखण्ड** न० स्कन्दपुराणान्तर्गते गणेशाविर्भवादिवेदके खण्डभेदे ।